अनन्तशयनसंस्कृतग्रन्थावलिः— ग्रन्थाङ्कः २१९

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयः

केरळविश्वविद्यालयः

रासोत्सवम्

प्रसाधकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयाध्यक्षः ।

१९६६/११४२

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।] [मूल्यं रूप्यकद्वयम्

INTRODUCTION

We have great pleasure in publishing the *Rāsotsava* of Mahiṣamaṅgalam which is one of the most beautiful lyrics in Sanskrit. This work originally appeared in the pages of the Sanskrit Journal[1] of the Kerala University Manuscripts Library and it is now being issued in book form as No 2 9 in the Trivandrum Sanskrit Series.

The author of this work belongs to the Mahiṣamaṅgalam family[2] also called Maḻamaṅgalam in Malayalam. There are two authors belonging to this family, namely Śankara and Nārāyaṇa. Nārāyaṇa says in his *Prāyaścittavimarśinī*[3] that he belongs to the Mahiṣamaṅgalam family in the Puruvana grāma, that he is the son of Śankara and that he studied mathematics. This Śankara

---

1. *Vol. XV Nos. 1 and 2.*
2. *See Dr. K. Kunjunni Raja - Contribution of Kerala to Sanskrit Literature - p. 158.*
3. *See the colophon -*

विश्वामित्रजदेवरातमुनिसंभूतोदलस्यान्वये
ग्रामे चापि महावने महिषपूर्वे मङ्गलाख्ये गृहे ।
जातः शङ्करनन्दनो गणितविन्नारायणाख्यो द्विजः
प्रायश्चित्तविमर्शिनीमरचयत् स्मार्तापराधेष्विमाम् ॥

Quoted in 'Contribution of Kerala to Skt. Literature- p. 158.

is the well-known astrologer and author of Malayalam commentaries on the *Kāladīpaka* (Bālaśaṅkaram), the *Muhūrtapadavi* and the *Laghubhāskarīya*'. He has also written several astronomical works namely *Gaṇitasāra*, *Candragaṇitakrama*, *Praśnasāra*, *Pañcabodhārthanirṇaya*, *Bhāṣākāladīpaka* etc[4]. in Sanskrit. He has written a grammatical work called *Rūpānayanapaddhati* where he says that he is Śaṅkara of the Mahiṣamaṅgalam house near Valli in Paruvana grāma, that he is writing this grammatical work while specializing in mathematics and that his date of birth is represented by the chronogram जातोऽहं हंसतुल्ये giving the kali date 1678168 which is equivalent to 1494 A. D[5]

There are some poetical works also by a member of the Mahiṣamaṅgalam family. Besides the well-known Bhāṇa called *Mahiṣamaṅgalabhāṇa*, there is a Malayalam Campu called *Bhāṣānaiṣadhacampu* which is

---

4. *For details see - Ullur S. Parameswara Iyer - Keralasahityacaritram - Vol. II. p. 269.*

5. *cf.*

ग्रामे पुरुवने वल्लीग्रामे महिषमङ्गले ।
'जातोऽहं हंसतुल्ये'ऽह्नि जातो यः शङ्कराह्वयः ॥
गणिते यतमानेन तेन व्याकरणाध्वनि ।
पदप्रचारहीनेनाप्येषा बालकृते कृता ॥

Quoted in Dr. K. K. Raja - contribution of Kerala to Sanskrit Literature - P. 158.

considered one of the best campus in Malayalam literature. There are also some Malayalam poems like the *Dārikavadham brāhmaṇippāttu* which are generally attributed to Mahiṣamaṅgalam. Another excellent Malayalam campu called *Koṭiyaviraham* is also attributed to the author of the *Bhāṣanaiṣadhacampu.* According to Ullur S Parameswara Iyer[6] many other Malayalam works like *Rājaratnāvalīyam, Bāṇayuddham Tirunṛttam, Pārvatīstuti* and *Viṣṇumāyācaritam* are also the works of the author of the *Bhāṣānaiṣadhacampu.* From a comparison of the *Bhāṇa* with the *Bhāṣānaiṣadhacampu,* it is clear that the two are by the same hand. So also, the present work *Rāsotsava* also called *Rasakrīdā*[7] and a campu called *Uttararāmacarita*[8] in Sanskrit are considered to be the works of the poet Mahiṣamaṅgalam. According to Dr. K. Kunjunni Raja[9] the identity of the authors of these works will be quite clear from a comparison of the verse[10]

---

6. *Keralasāhityacaritram Vol. II. p. 295.*

7. *R. 5282*

8. *No· I259B, A Descriptive Catalogue of Sanskrit Manuscripts in the Curator's Library, Trivandrum - Vol. VIII p. 2921 - 22 - (Ms. No. C. 1857 b. of the University Mss. Library, Tvm).*

9. *Contribution of Kerala to Sanskrit Literature p. 158-162*

10. वन्दारुदेवकुलमौलिविराजमान-
मन्दारमाल्यमधुवासितपादपीठम् ।
वन्दामहे वलयमन्दिरवासलोलं
चन्द्रावतंसवपुरर्धतपोविलासम् ॥ *Rāsotsava - Verse*

found in the *Rāsotsava* praising the Goddess Valayādhīśvari with the two introductory verses[11] of the *Uttararāmacaritacampu.*

In these circumstances, we have to assume that there lived two writers in the Mahiṣamaṅgalam family namely a poet and an astrologer. Generally it was assumed that the poet and the astrologer were identical. Kaikuḷaṅgara Rama Variar has said[12] that the author of the *Bhāṇa* was a famous scholar who was considered to be an incarnation of Bṛhaspati. There are also some old verses identifying the poet with the astrologer[13].

---

11. वन्दारुदेवगणमौलिविराजमान-
मन्दारसूनसुरभीकृतपादपीठाम् ।
संभावयामि हृदयेन सरस्वतीं ता-
मम्भोजयोनिवदनाम्बुजराजहंसीम् ॥

and

हस्तारविन्दधृतपुष्पशरेक्षुचाप-
पाशाङ्कुशानरुणभूषणमाल्यलेपान् ।
वन्दामहे वलयमन्दिरवासलोलां-
श्चन्द्रावतंसवपुरर्धतपोविलासान् ॥ *Uttararāmacaritacampu*

Quoted from the Descriptive catalogue of Skt. Mss. C. O. L., Tvm. Vol VIII p. 2921 - 22.

12. *See - the commentary on the* Mahiṣamaṅgalabhāṇa.

13. ज्योतिश्शास्त्रविदां पुरस्सर! सुरस्रोतस्विनीवीचिका
गर्वोन्मीलनकर्मठोद्भटवचःसन्दोहवाराम्बुधे! ।
विद्वन् विश्वजनाभिराम चिररात्राय क्षितौ जेजिहि
ध्वस्तामङ्गल! माषमङ्गलमहीगीर्वाणचूडामणे!

Quoted in Dr. K. K. Raja - C. K. S. L. page. 160

But Ullūr S. Parameswara Iyer[14] points out that the poet must be identified with Śankara's son Nārāyaṇa. This idea is supported by the statement of Vaṭakkuṁkūr Rajarajavarma[15] that the name of the author is suggested in the following stanza of the *Rāsotsava* -

गीतं श्रुतिस्वरपरिष्कृतरागबन्धं
<u>नारायणस्य</u> वदनाम्बुरुहप्रसूतम् ।
आपीय कर्णविवरेण जगत् समस्त-
मानन्दनाम्नि जलधाववगाढमासीत् ॥ verse 63

From the evidence thus available, we may conclude that the poet Mahiṣamaṅgalam who is said to be the author of several beautiful poems in both Sanskrit and Malayalam can be identified with 'Sankara's son Narayana, that he wrote the present work *Rāsotsava* from his profound devotion to Śrīkṛṣṇa[16] and that he himself was also an astrologer as he said in his *Prāyaścittavimarśinī*[17]. We know that Śankara was born in 1494 A. D. So, his son Narayana may be assigned to the

---

14. *Keralasahityacaritram Vol. II P. 295*

15. *Keraliyasaṁskṛtasāhityacaritram - part II pp. 639 - 40.*

16. शब्दागमेषु सुलभो न परिश्रमोऽस्ति
विद्वत्प्रमोदजनको न गिरां विलासः ।
उद्वेलमन्तरुदिता सरसीरुहाक्ष-
भक्तिः परं जनमिमं मुखरीकरोति ॥ *Rasotsava - Verse - 10*

17. *cf.* ज्ञातः शङ्करनन्दनो गणितविद् - *See - foot-note No. 3*

middle of the sixteenth century A. D.[18]

The *Rāsotsava* is a beautiful lyric poem in 220 verses in the Vasantatilaka metre, describing Śrīkṛṣṇa's sport with the Gopis on the banks of the Yamuna. The original inspiration of this poem comes undoubtedly from such store-houses of Kṛṣṇa legends as the Śrīmadbhāgavata and other Vaiṣṇava Purāṇas. The romantic story of Śrīkṛṣṇa must have been a living reality to the poet as well as to his audience. In the autumn season, Śrīkṛṣṇa beautifully adorned his body and went to Vṛndāvana to fulfil the desires of the Gopis. There, he played on his flute which attracted the hearts of the world. Hearing the melodious music on the flute, all the damsels of the cowherds gave up their several engagements and approached Śrīkṛṣṇa and prayed to fulfil their desires. Having heard the pitiful words of the Gopis, Śrīkṛṣṇa smiled and engaged himself in amorous sports with them.

Thus receiving honour from the Lord Kṛṣṇa, every one of the Gopikas considered herself the best of earthly women and was thus elated with pride. Beholding their arrogance produced by their good fortune and also their great pride, Śrīkṛṣṇa instantly disappeared from that place. Gopis then, not finding him, were greatly distressed and suffered from the pangs of separation. Having lost all strength the damsels of cowherds

18. *See - foot-note No. 5.*

wandered in the Vṛndāvana in search of Śrīkṛṣṇa. Lamenting at length and extolling the glories of Kṛṣṇa and longing to see him, the Gopis began to wail in a melancholy voice. Then Kṛṣṇa appeared before them. Thus beholding their beloved one so returning the eyes of the Gopis beamed with great delight and they simultaneously rose even as the limbs revive and perform their functions at the return of life. All these damsels were enraptured and they renounced all grief that had been caused by their separation from him and their prosperity increased in consequence of their having touched the body of Śrīkṛṣṇa.

Thereupon, Śrīkṛṣṇa began his sportive dance known as Rāsa in the company of the Gopikas. Having stationed himself between every two of these damsels, Kṛṣṇa commenced the festive dance. Each of the Gopis thought that Kṛṣṇa stood near herself and embraced her. Then desirous of freeing himself from fatigue, Kṛṣṇa entered the waters of the Yamuna in the company of the Gopis.

This beautiful romantic theme of Śrikṛṣṇa suffused with the sentiment of devotion is remarkably dealt with in the Rāsotsava. The beauty of Śrīkṛṣṇa's body, the charm of the tune of his flute, the longing of the Gopikas for Kṛṣṇa, Kṛṣṇa's meeting with the Gopis and his sports with them in Vṛndāvana, the arrogance and pride of the Gopis, Kṛṣṇa's sudden disappearance, the Gopika's pangs of separation and their search for Kṛṣṇa,

and prayer for his return, Kṛṣṇa's reappearance and finally the Rāsalīla – all these are charmingly described by the poet Mahiṣamaṅgalam. A few stanzas may be quoted as specimens.

Description of the sunset –

अर्के गते शिशिरतामपराद्रिलीने
तत्तापशक्तिरधिका विधिना न्यधायि ।
चक्रद्वयी मनसि नु व्रजसुन्दरीणां
चक्रायुधैकमनसां नु हृदन्तराले ॥ verse–23

आलक्ष्यमब्धिसलिले प्रतिबिम्बमारा-
दासन्नपातमिव बिम्बमशीतभानोः ।
एतद् द्वयं तुलितकाञ्चनकुम्भकान्ति
सन्ध्यावधूकुचयुगोपममाचकाशे ॥ verse–24

लोकान्तरं व्रजति भानुमति स्वकान्ते
शोकाकुलेव विगलन्मकरन्दबाष्पा ।
मीलन्मुखी कमलिनी करुणं न्यरोदी-
दन्तर्निरुद्धमधुकृन्निनदच्छलेन ॥ verse–25

The following ślokas which describe Śrīkṛṣṇa's adornment produce beautiful pictures before the reader's eyes –

बालेन्दुसुन्दररुचा रचितं ललाटे
गोरोचनातिलकमुज्ज्वलमावभासे ।

नारीजनान्तरुदितस्य मनोभवस्य
नीराजनाय निहिता मणिदीपिकेव ॥ verse-44

आभोगभाजिनि धृतं जघने चकाशे
पीताम्बरं मृदुतरं मधुकैटभारेः ।
बालातपद्युतिरिवापतिता विशाले
नीलाश्मभासि पुलिने तपनात्मजायाः ॥ verse-47

आतुङ्गरक्तनखपङ्क्तिदलाभिरामे
पादाम्बुजे कनकनूपुरमाशु मोच ।
यन्निःस्वने कुतुकिनी कलहंसपाली
नो केवलं परमहंसपरम्परा च ॥ verse-49

The following verses describe the tunes which Kṛṣṇa played on his flute.

गीतं श्रुतिस्वरपरिष्कृतरागबन्धं
नारायणस्य वदनाम्बुरुहप्रसूतम् ।
आपीय कर्णविवरेण जगत् समस्त-
मानन्दनाम्नि जलधाववगाढमासीत् ॥ verse-63

भृङ्गी विहाय मधुरं मधु सामिपीतं
सङ्गीतभङ्गिमनघामवकर्णयन्ती ।
अस्थादमन्दकुतुका निजपोतकानां
कूजान्निवार्य निभृतं कुमुदोदरान्ते ॥ verse-64

नेत्रान्तसीम्नि निजकान्तविषाणकोटि-
कण्डूयनादरमपास्य मृगी सुदूरम् ।

उत्तम्भितश्रवणमुद्गतरोमजाल-
मुन्नम्रकन्धरमतिष्ठदुदूढमोदम् ॥ verse-66

Description of Kṛṣṇa's sport with the Gopis –

अङ्के वधूमभिमुखीं विनिधाय काश्चि-
दाश्लिष्टमूर्तिरनया घनमायताक्ष्या ।
डोलाविहारमकरोद् धृतघर्मलेश-
मालोकयन्ननुपमं वदनं तदीयम् ॥ verse-124

तालीदलेन रचितं गलितं रतान्ते
ताटङ्कमीषदवलम्बिनि कर्णपाशे ।
कस्याश्चिदेष कलयन् कुतुकी चुचुम्ब
कस्तूरिकापरिमलोन्मिलिते कपोले ॥ verse-138

Description of Gopi's search for Kṛṣṇa –

एणाधिराजदयिते! किमु नन्दसूनु-
रालोकितो हृदयहारिवपुर्वधूनाम् ।
नो चेदकृत्रिमविलासतरङ्गभाजो-
रादीर्घयोर्नयनयोर्जननं वृथा ते ॥ verse-147

आचक्ष्व कोकवनिते! सति! नन्दसूनु-
रालोकितो यदि तदीयदशामशेषाम् ।
जानासि किं न निशि निश्यनुभूतियोगा-
न्नारीजनस्य निजकान्तवियोगखेदम् ॥ verse-148

In the description of Rāsalīla the following stanzas are especially beautiful.

सामोक्तिभिः सरसमित्यनुनीय सर्वाः
सोमाभिरामवदनाः सदनं दयायाः ।
ताभिः समं तदनुसारविहारमारा-
दारब्धवानधिकमोदभरो मुकुन्दः ॥ verse-191

मध्ये वितस्तिविमितं विनिधाय शङ्कुं
पार्श्वेषु तस्य परिमण्डलसम्प्रचारा ।
गोपीततिर्विरुरुचे विमला ध्रुवस्य
तारावलीव परितो नभसि भ्रमन्ती ॥ verse-192

एकाखिलक्रमसमुद्गतवल्गुगीतै-
र्वाचालकङ्कणकराञ्चलताडनैश्च ।
उन्मूर्च्छितैश्च रणितैर्मणिमेखलानां
दिङ्मण्डली सपदि शब्दमयी बभूव ॥ verse-196

From the stanzas quoted here as examples of Nārāyaṇa's style of poetic composition and from other similar verses in the work, one can hold the view that the *Rāsotsava* deservedly holds a high place in mediaeval lyric literature in Sanskrit The simplicity and directness of the poem show the distinctive features of a beautiful work of art. Like Jayadeva's *Gītagovinda* and Līlāśuka's *Kṛṣṇakarṇāmṛta*, the *Rāsotsava* is one of the best examples of erotico - mystic works.

The edition of the work is based on a manuscript No. 15271 available in the library of this Institute

and collected from Paliam Estate. The Manuscript is legible and written in Malayalam script.

I have been assisted in the publication of this work by Sri. A. Ramachandra Sastri, Research Officer, and Sri. M. Madhavan Unni and Sri. E. Easwaran Namboodiri, Assistant Research Officers of this Institute.

Oriental Research Institute
&
Mss. Library
Trivandrum
26 - 6 - 1966

K. Raghavan Pillai
Director

॥ रासोत्सवम् ॥

आतुङ्गमस्तकमनस्तमितानुभाव-
मातङ्गभारहरमङ्घ्रिसरोजभाजाम् ।
मोदं करोतु शिवयोः सुकुलैकमत्यं
मातङ्गमानुषवपुर्महितं महो वः ॥ १ ॥

प्रालेयशङ्खकुमुदस्फटिकावदातां
बालेन्दुमण्डितमनोज्ञकिरीटभाराम् ।
आलोकयामि मनसा वचसां सवित्रीं
नालीकयोनिवदनाम्बुजकेलिहंसीम् ॥ २ ॥

पारप्रयाणसुहृदः सकलागमानां
पापाम्बुराशिपरिशोषविधौ धुरीणाः ।
पायासुराधिहरणे भजतां प्रवीणाः
पादारविन्दतलपांसुकणा गुरूणाम् ॥ ३ ॥

हस्तारविन्दयुगलीधृतचापबाणं
वृत्रारिरत्नशकलद्युतिमेचकाङ्गम् ।
धन्यं महः किमपि शङ्करपङ्कजाक्ष-
पुण्यातिरेकपरिपाकमहं प्रपद्ये ॥ ४ ॥

वन्दारुदेवकुलमौलिविराजमान-
मन्दारमाल्यमधुवासितपादपीठम् ।
वन्दामहे वलयमन्दिरवासलोलं
चन्द्रावतंसवपुरर्धतपोविलासम् ॥ ५ ॥

शोणाधरार्पितमनोहरवेणु पीन-
श्रोणीपिनद्धमृदुलोज्ज्वलपीतचेलम् ।
वेणीभराकलितकोमलकेकिपिञ्छं
त्राणाय मे भवतु वस्तु तमालनीलम् ॥ ६ ॥

प्राचेतसो विजयतां प्रथमः कवीनां
प्राच्यः कविः स च पराशरजो मुनीन्द्रः ।
अद्याप्यशृङ्खलवचोविसरा जगत्यां
मार्गं ययोरनुसरन्ति महाकवीन्द्राः ॥ ७ ॥

भाग्येन केनचिदनर्गलमुज्जिहानै-
र्ये वर्णयन्ति वचनैरसतां चरित्रम् ।
माणिक्यजालममलं करसङ्गृहीतं
मन्दाः क्षिपन्ति ननु ते गहनान्धकूपे ॥ ८ ॥

भूभारभूतदनुजक्षपणाय गूढं
गोपालधाम्नि वसतो मधुकैटभारेः ।
व्यासादिभिः कविभिरादृतमादरेण
रासोत्सवं परिमितैः कथयामि पद्यैः ॥ ९ ॥

शब्दागमेषु सुलभो न परिश्रमोऽस्ति
विद्वत्प्रमोदजनको न गिरां विलासः ।
उद्वेलमन्तरुदिता सरसीरुहाक्ष-
भक्तिः परं जनमिमं मुखरीकरोति ॥ १० ॥

नारीजनं रमयितुं धृतगोपवेषे
नारायणे मनसि कौतुकमादधाने ।
अभ्याजगाम शरदम्बुजवक्त्रलक्ष्य-
मल्पेतरं कमपि विभ्रममुद्वहन्ती ॥ ११ ॥

संक्षीयमाणतनवोऽप्यधिकं प्रसन्नाः
संदृश्यमाननवसैकतपाण्डराभाः ।
आमन्दसुन्दरगताः सरितोऽनुचक्रुः
कामानुषङ्गसुभगं कमनीकदम्बम् ॥ १२ ॥

माध्वीरसं रसयतामलिपोतकानां
कोलाहलेन मिलतां नलिनोदरेषु ।
सन्नाहिनस्त्रिजगतीविजये स्मरस्य
जन्यप्रयाणजलजध्वनिरन्वकारि ॥ १३ ॥

आपादचूडमुदितान्यसमच्छदाना-
मापाण्डराणि कुसुमानि परं विरेजुः ।
पुञ्जीकृतानि भुवनोदरपञ्जरान्तः
पञ्चायुधस्य विशदानि यथा यशांसि ॥ १४ ॥

आमोदिनं यदतनोदरविन्दयूथ-
मिन्दुं च यद्व्यधित सान्द्रकरप्रसादम् ।
तेनैव केवलमभूदभिनन्दनीया
लोके गुणेन महता शरदागमश्रीः ॥ १५ ॥

मल्लीलता विकसितैः कुसुमैर्विरेजु-
स्तानि द्विरेफपटलैर्मधुपानलोलैः ।
ते तत्क्षणं समुदितेन मदेन सोऽपि
रेजे मदो रतिपतेरपदानभेदैः ॥ १६ ॥

नैशं तमो विगतकल्पषमभूदमन्दं
वेशन्तगान्यपि शिवानि जलान्यभूवन् ।
आशान्तराणि विमलत्वमितान्यशेषा-
ण्याचान्तसप्तजलधावुदिते मुनीन्द्रे ॥ १७ ॥

आकाशमार्गमकठोरकरीरकान्त-
मातन्वती निजशरीररुचां प्ररोहैः ।
सन्दृश्यते स्म परिषत् कुटिलाग्रचञ्चु-
सन्दष्टपक्ककणिका शुकशारिकाणाम् ॥ १८ ॥

गाम् मानसादभियुः कनकारविन्द-
किञ्जल्करञ्जितपतत्रपुटाः पतन्तः ।
निष्पादिताखिलमुदो निजनादभङ्ग्या
दक्षाः परस्परयुजोः पयसोर्विवेके ॥ १९ ॥

मन्दप्रयाणचतुरा मधुगन्धलुब्धै-
रिन्दिन्दिरैरनुगता मृदुमुग्धनादैः ।
नन्दात्मजस्य मुदमादधिरे निकाम-
मान्दोलितव्रजवधूचिकुराः समीराः ॥ २० ॥

सन्दर्शितात्मविभवे भुवि दिव्यतीर्था
नन्दात्मजानुसरणार्थमृतौ तुरीये ।
सन्ध्या सविभ्रममुपेत्य हरिं सिषेवे
सम्फुल्लसूनहसिता नवमल्लिकानाम् ॥ २१ ॥

अश्रान्तसञ्चरणसम्भृतसादवेग-
मुद्भूतघर्मकणदन्तुरमङ्गमेतत् ।
इत्थं विचिन्त्य मनसैव मिमंक्षुरब्धा-
वस्ताद्रिशृङ्गमभजत् कमिता नलिन्याः ॥ २२ ॥

अर्के गते शिशिरतामपराद्रिलीने
तत्तापशक्तिरधिका विधिना न्यधायि ।
चक्रद्वयीमनसि नु व्रजसुन्दरीणां
चक्रायुधैकमनसां नु हृदन्तराले ॥ २३ ॥

आलक्ष्यमब्धिसलिले प्रतिबिम्बमारा-
दासन्नपातमिव बिम्बमशीतभानोः ।
एतद् द्वयं तुलितकाञ्चनकुम्भकान्ति
सन्ध्यावधूकुचयुगोपममाचकाशे ॥ २४ ॥

लोकान्तरं व्रजति भानुमति स्वकान्ते
शोकाकुलेव विगलन्मकरन्दबाष्पा ।
मीलन्मुखी कमलिनी करुणं न्यरोदी-
दन्तर्निरुद्धमधुकृन्निनदच्छलेन ॥ २५ ॥

कान्तासपीतिसरसं कमलोदरान्ते
माध्वीरसं कबलयन्मधुपो दिनान्ते ।
संरोधवृत्तमुदितं न विवेद किञ्चित्
सान्द्रोपगूहनरसेन निजप्रियायाः ॥ २६ ॥

आगामिनं विरहवेगमसह्यताप-
मालोच्य चेतसि रथाङ्गवधूरधीरा ।
आश्लिष्य गाढमधिकप्रणयाभिराम-
मात्मप्रियं व्यसृजदास्रकणानशीतान् ॥ २७ ॥

पीडाभरं मनसि सर्वमपि त्यजन्तः
क्रीडापरान् कलभकानवलोकयन्तः ।
गाढादरेण मिलता गृहिणीजनेन
नीडोदरेषु ससुखं न्यवसन् विहङ्गाः ॥ २८ ॥

सम्मीलितानि कमलानि गते पतङ्गे
नोन्मीलितान्यनुदिते कुमुदानि चेन्दौ ।
अत्रान्तरे मधुकराः प्रययुः प्रहृष्टा
मल्लीप्रसूनविततिं मकरन्दलोलाः ॥ २९ ॥

इन्धानसान्द्रसुषमा विषमायुधस्य
  सन्तन्वती कमपि बाहुबलावलेपम् ।
सन्ध्या बबन्ध सुभगैः स्वगणप्रबन्धैः
  सन्तोषमन्तरधिकं मधुकैटभारेः ॥ ३० ॥

अन्तर्हितः प्रथमशैलतटीनिकुञ्जे
  सम्पादयन् सुभगतातिशयं कलानाम् ।
सन्ध्याविरामसमयं प्रतिपाल्य तस्था-
  विन्दुः स्वकान्तिपटलीं प्रकटीचिकीर्षुः ॥ ३१ ॥

आपाण्डरेण वदनेन निवेदयन्ती
  स्वान्तस्थितं विधुममर्त्यकुलावलम्बम् ।
प्राची दिशा च परिषत् पशुपाङ्गनानां
  चान्योन्यसाम्यपदवीक्षणमन्वभूताम् ॥ ३२ ॥

उद्योगवत्युडुगणाधिपतावुदेतु-
  मुद्वेलकौतुकधरास्तरसा चकोराः ।
आतेनिरे गळगुहागळितैरमन्दैः
  कोलाहलैः कुमुदिनीमपनीतनिद्राम् ॥ ३३ ॥

अस्तोककान्तिभरमम्बुधितोयगर्भा-
  दभ्योदितं परिललास हिमांशुबिम्बम् ।
दोरन्तरान्मुरहरस्य समुत्थितायाः
  फालप्रदेश इव मङ्गलदेवतायाः ॥ ३४ ॥

कल्लोलिनीरमणमात्ममहःप्ररोहै-
रुल्लोलयन् प्रथमभूधरशृङ्गरङ्गे ।
आपूर्णमण्डलमलक्ष्यत बिम्बमिन्दोः
प्राचीवधूकनककन्दुकसान्द्रशोभम् ॥ ३५ ॥

प्रालेयभानुरुदितो मृदुभिः कराग्रै-
रामोदयन् कुमुदिनीं स्पृशति स्म मन्दम् ।
सा चातिरागमधुरेण चिरागतेन
स्पृष्टा प्रियेण विकसद्वदना बभूव ॥ ३६ ॥

पाथोजिनी प्रकटितस्फुरणा विलासैः
कुत्सां यदात्मनि ततान दिवा निगूढम् ।
द्रागेव तत्प्रतिकृतिर्निशि कैरविण्या
लोके स्त्रियो ननु परस्परमत्सरिण्यः ॥ ३७ ॥

पाथोरुहाणि भुवने मुकुलीकृतानि
वीतव्यथानि विहितान्यपि कैरवाणि ।
उत्सारितान्यपि च सन्तमसानि दूरं
सद्यः स्वकृत्यमखिलं विधुना व्यधायि ॥ ३८ ॥

वृन्दैरमन्दविसरैर्जगदश्नुवानै-
रिन्दोर्गवामभिनवस्फटिकावदातैः ।
वृन्दावनं तदभिनन्दितसर्वसत्त्वं
मन्दाकिनीसलिलमग्नमिवाबभासे ॥ ३९ ॥

गाधेतरं मधुजिता कृतसन्निधानं
पाथोनिधेः सलिलमुत्क्षुभितं बभूव ।
पादैर्विधोरभिनवैः परितः पतद्भि-
श्चेतोऽपि गोपसुदृशां कुसुमास्त्रबाणैः ॥ ४० ॥

लोकाभिरामतरया शरदा स्फुरन्त्या
श्लाघापदे समुदिते तदनु प्रदोषे ।
आकाङ्क्षितं पशुपवामदृशां विधातु-
मामोदवानकृत मानसमब्जनाभः ॥ ४१ ॥

गोपीजनस्य नयनप्रमदं विधातु-
मापीतरूपसुषमः कमलाकटाक्षैः ।
आत्मानमाभरणमप्रतिमं जगत्यां
दैत्यारिरात्तरसमाभरणैरयुङ्क्त ॥ ४२ ॥

आलक्ष्यचारुतरचन्द्रकसान्द्रशोभां
मौलौ बबन्ध सुभगे शिखिपिञ्छमालाम् ।
शृङ्गारविद्रुममयं व्रजसुन्दरीणां
शङ्के प्रदर्शयितुमद्भुतमिन्द्रजालम् ॥ ४३ ॥

बालेन्दुसुन्दररुचा रचितं ललाटे
गोरोचनातिलकमुज्ज्वलमाबभासे ।
नारीजनान्तरुदितस्य मनोभवस्य
नीराजनाय निहिता मणिदीपिकेव ॥ ४४ ॥

आलम्बिनीं गलतले ललितां लसन्ती-
मालापनव्यतिकरादतिमात्रशैत्याम् ।
आमोदिनीमभिमतामुरसा बभार
नारीमिवातिरुचिरां वनसूनमालाम् ॥ ४५ ॥

गुञ्जाफलैर्विरुतमेचकपाटलाभै-
र्मालां बबन्ध कलिकां कटकप्रदेशे ।
यत्कान्तिरुत्कटतरा हरिनीलकान्ति-
र्माणिक्यकान्तिमपि दूरमयश्चकार ॥ ४६ ॥

आभोगभाजिनि धृतं जघने चकाशे
पीताम्बरं मृदुतरं मधुकैटभारेः ।
बालातपद्युतिरिवापतिता विशाले
नीलाश्मभासि पुलिने तपनात्मजायाः ॥ ४७ ॥

आमोदवान् मणिविचित्रितहेमदाम्ना
दामोदरः परिहितं वसनं बबन्ध ।
रागानुबन्धमधुरं मदनार्दितानां
चेतोऽपि नन्दनगरीव्रजसुन्दरीणाम् ॥ ४८ ॥

आतुङ्गरक्तनखपङ्क्तिदलाभिरामे
पादाम्बुजे कनकनूपुरमामुमोच ।
यन्निःस्वने कुतुकिनी कलहंसपाली
नो केवलं परमहंसपरम्परा च ॥ ४९ ॥

भूतं भविष्यदपि चेतसि वस्तुजातं
यो देशकालवशतोऽपि च विप्रकृष्टम् ।
पश्यत्यसौ निजमुखप्रतिमां दिदृक्षुः
पाणौ बभार मुकुरं कुकुराधिनाथः ॥ ५० ॥

इत्थं प्रसाधितवपुः पशुपाङ्गनाना-
मुद्दीपयन्मनसि मन्मथमुन्मदानाम् ।
देवः प्रदोषविरतौ प्रथमानधामा
चक्रे पदं तटवने तपनात्मजायाः ॥ ५१ ॥

मन्दोन्मिषत्कुसुमविभ्रममञ्जुहासा
चन्द्रातपप्रसरचन्दनचर्चिताङ्गी ।
वृन्दावनस्य सुभगा वितताम लक्ष्मी-
र्नन्दात्मजस्य हृदये परमं प्रमोदम् ॥ ५२ ॥

आमन्दचारुमरुदापतनावधूत-
शाखाशिखाविगलितैर्ललितैः प्रसूनैः ।
आराधनं विदधुरङ्घ्रियुगोपकण्ठे
नारायणस्य तरवो गुरुपुण्यपूराः ॥ ५३ ॥

बालायिता मृदुतरैर्लतिका मरुद्भिः
किञ्चिद्विनम्रतनवस्तबकातिभारात् ।
तोषं दधुर्मनसि तस्य मृदुप्रयाणा
योषा इव स्तनतटीभरणावनम्राः ॥ ५४ ॥

मूर्च्छालयातिसुभगैर्मदनातुराणां
मूर्च्छाकरैर्निजगलागलितैर्निनादैः ।
आपीतनूतनमधुर्व्यधितातिमात्र-
मानन्दिनं मधुकरी मधुराधिनाथम् ॥ ५५ ॥

निर्वृत्तमज्जनसुखा मकरन्दतोये
सप्तच्छदप्रसररेणुपरिष्कृताङ्गाः ।
तं तुष्टुवुर्मधुकरा मधुरैर्विरावै-
रुच्चैस्तरामुपनिषद्भिरिव द्विजेन्द्राः ॥ ५६ ॥

मन्देतरं हुवुहुवुस्वनमुद्गिरन्त-
स्तुङ्गेषु शाखिशिखरेषु परिस्खलन्तः ।
अन्तर्मुदं यदुपतेर्विदधुः समन्ता-
च्चद्रांशुपानमदनिघ्नधियश्चकोराः ५७ ॥

वल्लीभिरुल्लसितसूनमृदुस्मृताभि-
स्सल्लापिनीभिरलिनीविरुतैरुदारैः ।
आलिङ्गितास्तरुवरा दृढमाशिखाग्र-
मातेनिरे नयनयोः कुतुकं मुरारेः ॥ ५८ ॥

वानीरवेश्मसु तुषारमरीचिभासा-
मापातजर्जरितसन्तमसान्तरेषु ।
शीतेषु तीरविपिने तपनात्मजाया-
श्चेतो बभूव मुहुरुत्सुकमेतदीयम् ॥ ५९ ॥

पश्यन् वनश्रियमनुज्झितकान्तिपूरां
विश्वेश्वरः क्षणमसौ विचचार मन्दम् ।
शृण्वन् कलानि विरुतानि तटे तटिन्याः
कर्णामृतानि कलहंसविलासिनीनाम् ॥ ६० ॥

हृद्ये ततः क्वचन कल्पकशाखिमूले
पत्रान्तरालपतदुज्ज्वलचन्द्रपादे ।
रत्नप्रवेकघटितां विततां वितर्दि-
मध्यारुरोह कुतुकी जगतां विनेता ॥ ६१ ॥

तत्रोपविश्य सरसं सरसीरुहाक्षः
सुत्रामरत्नकलिते विमले प्रदेशे ।
देवो निजादगलयद्वदनेन्दुबिम्बाद्
गीतामृतं किमपि मोहनमिन्द्रियाणाम् ॥ ६२ ॥

गीतं श्रुतिस्वरपरिष्कृतरागबन्धं
नारायणस्य वदनाम्बुरुहप्रसूतम् ।
आपीय कर्णविवरेण जगत् समस्त-
मानन्दनाम्नि जलधाववगाढमासीत् ॥ ६३ ॥

भृङ्गी विहाय मधुरं मधु सामिपीतं
सङ्गीतभङ्गिमनघामवकर्णयन्ती ।
अस्थादमन्दकुतुका निजपोतकानां
कूजान्निवार्य निभृतं कुमुदोदरान्ते ॥ ६४ ॥

तत्तादृशप्रणयसारमनुस्मरन्ती
शक्त्या विधेर्विघटितं दयितं निशायाम् ।
उद्भ्रान्तबाष्पसलिलापि रथाङ्गयोषि-
दुत्कर्णतामगमदुत्सुकिनी क्षणेन ॥ ६५ ॥

नेत्रान्तसीम्नि निजकान्तविषाणकोटि-
कण्डूयनादरमपास्य मृगी सुदूरम् ।
उत्तम्भितश्रवणमुद्गतरोमजाल-
मुन्नम्रकन्धरमतिष्ठदुदूढमोदम् ॥ ६६ ॥

प्रत्यर्पितं प्रणयिना कलहंसतन्वी
प्रत्यग्रमोदसरसं बिसमाददाना ।
मोदान्तरेण कबलीकृतचित्तवृत्ति-
स्तस्थौ प्रसारितसमुन्नतचञ्चुकोटिः ॥ ६७ ॥

आरब्धघोरकलहावपसक्तकुम्भा-
वन्योन्यपातपरिखण्डितदन्तकुन्तौ ।
विस्मृत्य चेतसि विरोधकथां तथैव
स्तब्धौ स्थितावधिकमुत्सुकिनौ करीन्द्रौ ॥ ६८ ॥

आन्दोलनस्फुरितकुण्डलमुत्तमाङ्ग-
मन्तःप्रमोदविसरेण विकम्पयन्ती ।
गन्धर्वसन्ततिरतिप्रमदा बभूव
सन्तर्जितामृतरसेन हरेः स्वरेण ॥ ६९ ॥

सग्रामपत्तनपुरं ससरित्समुद्रं
सद्वीपभूधरकुलं समृगोरगौघम् ।
किं विस्तरेण वचसां त्रिजगत् समस्त-
मालेख्यसख्यमभजन्निभृतं क्षणेन ॥ ७० ॥

नादेन तेन नवरागतरङ्गितेन
नारायणस्य निखिलेन्द्रियकार्मणेन ।
दूरापकृष्टमनसस्तरसाभिजग्मु-
र्नारीजनास्तदुपकण्ठमकुण्ठरागाः ॥ ७१ ॥

आकारयत्ययमनङ्गशरातुराङ्गीं
मामेव गीतकपटेन धृतानुरागः ।
प्रत्येकमित्थमकरोन्मतिमङ्गनानां
वर्गो निरर्गलमनोरथपद्धतीनाम् ॥ ७२ ॥

आकृष्यमाणहृदया मदनेन काचि-
दारब्धमात्रपरिलुप्तविलेपनश्रीः ।
पाणौ निधाय विमलं हिमतोयसिक्तं
पाटीरपङ्कमगमत्सविधं मुरारेः ॥ ७३ ॥

कस्तूरिकातिलकभङ्गिविलोकनार्थ-
मुद्योगिनी श्रवणहारि निशम्य गीतम् ।
अन्या चचाल मणिदर्पणमुद्वहन्ती
वक्त्रारविन्दजितमिन्दुमिवैकपाणौ ॥ ७४ ॥

हस्ताञ्चले कनकसूत्रनियन्त्रितेन
व्यक्ताक्षरं निगदता मदनागमार्थम् ।
नालीकलोचनसमीपमभिप्रपेदे
केलीशुकेन सह काचन गोपनारी ॥ ७५ ॥

साकं प्रियेण निशि देवनमाचरन्ती
गीतं निशम्य तदनङ्गशराभिभूता ।
आरादधावत परा मणिकल्पितेन
शारेण तारकितचारुकराग्रदेशा ॥ ७६ ॥

हित्वा शिशुं परिसरे सुसुखं शयानं
सुप्तं पतिं च सहसा शयनीयदेशात् ।
उत्थाय धूतधिषणा मकरध्वजेन
मत्तेव काचिदभजन्मधुजित्सकाशम् ॥ ७७ ॥

आलोलचारुचिकुरा करपल्लवाभ्या-
मालम्बितस्तनभरा विरणद्विभूषा ।
आलुप्यमानतिलका श्रमवारिलेशै-
रन्या वधूरधिगतत्वरमभ्यधावत् ॥ ७८ ॥

ताटङ्कमागलितमेकमतीव वेगा-
देकेन पाणिकमलेन समुद्वहन्ती
देवे निबद्धरतिरन्यवधूरधाव-
न्नीवीनिरोधनिरतान्यकरारविन्दा ॥ ७९ ॥

बद्धा निजेन दयितेन गृहोदरान्ते
मुक्तेरुपायमपरा परिचिन्तयन्ती ।
चित्तस्थितेन पुरुषेण परेण सद्यो
मुक्ता बभूव परिखण्डितसर्वबन्धा ॥ ८० ॥

इत्थं गता मदनमान्त्रिकबाणमन्त्रै-
रुच्चाटिता इव गृहान्निशि निस्सहायाः ।
अस्तोककौतुककरं वनितेक्षणाना-
मद्राक्षुरम्बुजविलोचनमायताक्ष्यः ॥ ८१ ॥

कालाम्बुवाहपटलस्य कलिन्दजायाः
कालागुरोरपि कलायमणीचकानाम् ।
एकीकृतैरिव घनैर्घटितैर्महोभि-
र्नीलिम्नि दूरमवगाढमनोहराङ्गम् ॥ ८२ ॥

आरोप्य दक्षिणपदाब्जमदक्षिणोरा-
वासीनमुज्ज्वलतरे कलधौतपीठे ।
आलम्बनेन जगतामवलम्बितेन
पादाब्जपीठमपरेण परामृशन्तम् ॥ ८३ ॥

मञ्जीररत्ननिकरद्युतिमञ्जरीणां
पुञ्जेन पिञ्जरितमङ्घ्रियुगं वहन्तम् ।
आभासुरेण पतता धृतपाटलिम्ना
बालातपेन धृतशोभमिवारविन्दम् ॥ ८४ ॥

आडम्बरासहरुचा कनकाम्बुजेन
पीताम्बरेण परिणद्धनितम्बबिम्बम् ।
अस्पृष्टतापविसरैर्वनवह्निकीलै-
राक्रान्तमूलमिव मुग्धतमालपोतम् ॥ ८५ ॥

आतुङ्गकान्तिरुचिरां धृतपीतचेल-
व्यासङ्गिनीं मणिमयीं रशनां वहन्तम् ।
सक्तामलक्तकमहोमुचि सान्ध्यमेघे
विद्युल्लतामिव विहीनचलस्वभावाम् ॥ ८६ ॥

आबिभ्रतं सुभगकान्तिभराभिरामा-
माभोगिनीमुदरसीमनि रोमवल्लीम् ।
चापल्यदोषरहितां निहितां द्वितीयां
ज्यावल्लरीमिव जगज्जयिना स्मरेण ॥ ८७ ॥

आलोलकान्तिसुभगं वनमालिकानां
जालं वहन्तमुरसा कमनीयभासा ।
आलीनधातुरसचित्रमधिक्षिपन्तं
नीलाचलागलितनिर्झरकान्तिपूरम् ॥ ८८ ॥

वक्षःस्थले मरतकाश्मतलाभिरामे
बिभ्राणमप्रतिमकान्तिपरिष्कृताशम् ।
श्रीकौस्तुभं वियति नीलमणिप्रकाशे
विद्योतमानमिव नूतनमर्कबिम्बम् ॥ ८९ ॥

मालेयसौरभवता लसदङ्गदेन
बाहुद्वयेन नितरां परिभासमानम् ।
पाटीरपादपमिवावनतेन दूरं
शाखाद्वयेन विलगद्विलसद्वरेण ॥ ९० ॥

बन्धूकबन्धुररुचामधरप्रभाणा-
मन्तर्गतैरमलदन्तमहःप्ररोहैः ।
सन्तर्जयन्तमनघं सुषमाविशेषं
सन्ध्याघने विलसतामुडुमण्डलानाम् ॥ ९१ ॥

निर्धूतनीलसरसीरुहचारुताभ्यां
निस्तन्द्रविभ्रमविशेषतरङ्गिताभ्याम् ।
प्लुष्टं पुरा पुररिपोरलिकेक्षणेन
सञ्जीवयन्तमिव पुष्पशरं दृशाभ्याम् ॥ ९२ ॥

स्वर्णोपमानरुचिसुन्दरकर्णिकार-
कर्णावतंसयुगलीपरिभासुरेण ।
पार्श्वद्वयोल्लसितजीवसितस्य लक्ष्मीं
कार्श्यं मुखेन मधुरेण नयन्तमिन्दोः ॥ ९३ ॥

कल्लोलकान्तिलहरीविभवं क्षिपद्भि-
र्निर्लूनफुल्लशरचापलतावलेपैः ।
चिल्लीलताविलसितैस्तरुणीजनाना-
मुल्लोलयन्तमुदिताङ्गजमन्तरङ्गम् ॥ ९४ ॥

दूरीकृतामृतकरार्धकभासि फाले
　गोरोचनाविरचितं तिलकं दधानम् ।
माराग्निदीपनकरं मदिरेक्षणाना-
　मालिप्तहेममिव कञ्चन तालवृन्तम् ॥ ९५ ॥

चञ्चत्प्रभाविसरवञ्चितचञ्चलीकं
　किञ्चिद्विनम्रमलकोत्करमुद्वहन्तम् ।
पञ्चास्त्रवीरपृतनापरिपालकस्य
　पिञ्छातपत्रमिव नूतनमाननेन्दोः ॥ ९६ ॥

मुग्धप्रवालमिलितप्रचलाकमाला-
　बन्धस्य कैशिकभरस्य महोविलासैः ।
मध्यानुविद्धवलवैरिशरासनस्य
　स्निग्धस्य नीलजलदस्य हरन्तमाभाम् ॥ ९७ ॥

आपादचूडविधृताभरणांशुजालै-
　रापाटलीकृतमनोहरमेचकाङ्गम् ।
आलिप्तमूर्तिमचिरांशुकणैरसंख्यै-
　राभोगभाजमिव नूतनतोयवाहम् ॥ ९८ ॥

पाणिद्वयेन विरणन्मणिभूषणेन
　पादाम्बुजेन च मुहुः सुगृहीततालम् ।
चेतोहरं तनुमतां वदनेन्दुबिम्बाद्
　गीतं परिस्फुटपदाक्षरमुद्वमन्तम् ॥ ९९ ॥

सच्चिन्मयं पुरुषमादृतगोपवेषं
वश्यं पदाब्जयुगलीनतितत्पराणाम् ।
दृग्भिर्निबद्धकुतुकं नितरां पिबन्त्य-
स्तृप्तिं न जग्मुरबलाः पशुपालकानाम् ॥ १०० ॥

पश्यन् पुरः पुरविरोधिविरोधिबाणै-
र्निःश्चूषितात्ममनसः पशुपालयोषाः ।
निश्च्योतदल्पहसितामृतवक्त्रचन्द्रो
विश्वेश्वरः स निजगाद गिरं गभीराम् ॥ १०१ ॥

दिष्ट्या दृशोरुपगताः पदवीं भवत्यः
कच्चिद् गृहेषु कुशलं पशुपालकान्ताः! ।
किं वा पुनर्गुरुनितम्बभरासहानि
पादाम्बुजान्यसमये परिखेदितानि ॥ १०२ ॥

क्रीडागृहेषु कुसुमोत्करमण्डितेषु
चूडापदेषु च पुनः पशुपालयूनाम् ।
येषां परं परिचयः पदपल्लवानां
तेषामयं ननु विषादकरः प्रचारः ॥ १०३ ॥

वृन्दावनाद्वितत चन्द्रकरादमुष्मा-
दन्तर्गृहं व्रजत सम्प्रति गोपनार्यः! ।
युष्मन्मुखेन्दुनिकरैः परितर्जितस्य
चन्द्रस्य मा भवतु चेतसि कोऽपि खेदः ॥ १०४ ॥

आकर्णने यदि मनः कलहंसिकानां
   कोलाहलस्य यमुनापुलिनाश्रयाणाम् ।
आकर्णयन्तु रणितं जघनाश्रयाणा-
   मासां ततोऽपि मधुरं मणिमेखलानाम् ॥ १०५ ॥

यद्वा विलोकयितुमद्य समुत्सुकिन्यो
   वल्लीकुलानि विकसत्कुसुमोत्कराणि ।
अन्योन्यमेव ललितानि विलोकयन्तु
   गात्राणि वो मणिविभूषणमण्डितानि ॥ १०६ ॥

किञ्चाधुना वनगुहासु तमोवृतासु
   सञ्चारमञ्चितगता न मुहुः कुरुध्वम् ।
सन्ध्याविरामसमये खलु सञ्चरन्ति
   सन्दंशनप्रणयिनः सुलभा भुजङ्गाः ॥ १०७ ॥

स्वच्छन्दतो विचरणं निशि नैव युक्तं
   नारीजनस्य निजभर्तृजने परोक्षे ।
तत्राप्ययुक्ततरमेतदरण्यभूमौ
   पुंसः परस्य मम सञ्चरणं समीपे ॥ १०८ ॥

मत्प्रीणनाय यदि सम्मिलिताः समेता-
   स्तद्युज्यते व्रजत गेहमितस्तथापि ।
यत्र क्वचिन्निवसतापि जनेन शक्यं
   कर्तुं तदेतदबला न परं समीपे ॥ १०९ ॥

साध्वीजनस्य पतिरेव परं हि दैवं
साध्यस्ततस्तदुपचारविधिर्वधूभिः ।
जारानुषक्तिरबलाः! सुकुलोद्भवस्य
नारीजनस्य सुजनैर्ननु निन्दनीया ॥ ११० ॥

आकर्ण्य तद्वचनमाहतसख्यबन्धं
हालाहलानुमिलितेन सुधारसेन ।
गोपाङ्गनाः प्रणयकौतुकरोषभीति-
व्रीळाविषादभरभिन्नधियो बभूवुः ॥ १११ ॥

आस्राविलाक्षमधिकस्फुरिताधरोष्ठ-
माभुग्नचिल्लि वदनं विनतं वहन्त्यः ।
तस्थुः क्षणं गळविलीनगलास्तरुण्यः
पृथ्वीं पदाङ्गुलिदलेन समुल्लिखन्त्यः ॥ ११२ ॥

आपूर्णबाष्पसलिले नयने विमृज्य
कोपानुषङ्गकलुषे करपल्लवाभ्याम् ।
अन्तर्नियम्य शुचमापतितां कथञ्चि-
दम्भोरुहाक्षमबलाः पुनरेवमूचे ॥ ११३ ॥

मा मा विभो! कथय विप्रियमभ्युपेते
कामातुरे कुरु कृपामबलाजनेऽस्मिन् ।
सोमाभिराममुख! सम्प्रति कल्पयाम-
स्त्वामेव देव! दयितं परदैवतं च ॥ ११४ ॥

ताटस्थ्यमुद्रितपदानि निसर्गहृद्या-
न्येतानि नाथ! वचनानि तवेदृशानि ।
सन्तापयन्ति नितरामवकर्णितानि
रोमाञ्चयन्ति च मुहुर्मुहुरङ्गकानि ॥ ११५ ॥

एनं यदि त्यजसि पञ्चशरामयेन
दूनं जनं न पुनरस्त्यपरोऽवलम्बः ।
इन्दुर्निजैः करगणैर्यदि नो धिनोति
कं वा प्रयान्तु शरणं भुवि कैरविण्यः ॥ ११६ ॥

भर्तुर्निजस्य परिचारविधिर्वधूनां
शुद्धः स्वधर्म इति धर्मविदा त्वयोक्तम् ।
अस्त्वेवमेतदबला न परं समीपे
त्वत्तः स्वधर्ममवकर्णयितुं समेताः ॥ ११७ ॥

नादामृतेन तव लोकमनोहरेण
रूपामृतेन च मुहुः परिमोहितानाम् ।
आपूरयाभिलषितं पशुपालिकाना-
मासां पदाब्जयुगलीपरिचारिकाणाम् ॥ ११८ ॥

उद्दीप्यते मनसि कोऽपि च मन्मथाग्नि-
स्तप्तानि तेन सकलान्यपि चाङ्गकानि ।
सत्येतरं यदि वचस्तदिदं कुचान्ते
न्यस्ते कराम्बुजतले भवतावगम्यम् ॥ ११९ ॥

नाथ! त्वया निगदितं गहनादमुष्मा-
  द्यातेति यत् तदुचितं श्रवसा धृतं च ।
प्रेमप्ररोहमयपाशदृढावनद्धा
  यामः प्रभो! तव कथं चरणोपकण्ठात् ॥ १२० ॥

तासामिति प्रलपितं व्रजसुन्दरीणां
  देवो निशम्य करुणातरलीकृतात्मा ।
मुग्धस्मितार्द्रवदनाम्बुरुहः स ताभिः
  सत्रा विहर्तुमुदतिष्ठदथासनात् स्वात् ॥ १२१ ॥

आलोलभूषणझणत्करणाभिराम-
  मामोदवानवरुरोह च वेदिकायाः ।
आविर्भवत्प्रणयनिर्भरविभ्रमाभि-
  रालम्बिताग्रकरपल्लवमङ्गनाभिः ॥ १२२ ॥

साकं करम्बितकराम्बुरुहाञ्चलाभि-
  स्ताभिर्मदालसमनोज्ञपदक्रमाभिः ।
माद्यन्नसौ विपिनसीम्नि चिरं विजह्रे
  सार्धं करेणुनिकरैरिव मत्तहस्ती ॥ १२३ ॥

अङ्के वधूमभिमुखीं विनिधाय काञ्चि-
  दाश्लिष्टमूर्तिरनया घनमायताक्ष्या ।
डोलाविहारमकरोद् धृतघर्मलेश-
  मालोकयन्ननुपमं वदनं तदीयम् ॥ १२४ ॥

आरोप्य काञ्चिदबलां स्वयमेव डोला-
मान्दोलयन्नतितरां मुमुदे मुकुन्दः ।
वेणीभरेण गलता वलतातिवेगा-
दायामिनं विदधतीमिव कायमानम् ॥ १२५ ॥

मन्दं प्रयाहि दयित! प्रतिपालयैनां
मन्दागमां कुचनितम्बभरश्रमेण ।
यद्येतयोरवगता गुरुता प्रयाण-
मित्थं न ते भवति काचिदिति न्यगादीत् ॥१२६॥

एह्येहि नाथ! विनिवारय भृङ्गमेनं
बिम्बाधरे मम पतन्तमिति ब्रुवाणा ।
नीत्वा हरिं रहसि काचन कामदूना
पीत्वा तदीयमधरं मधुरं मुमोद ॥ १२७ ॥

दन्ताञ्चलप्रहरणेन करोमि वंशी-
संशीलनाक्षममिदं तव दन्तवासः ।
स्मित्वा सलीलमिति काचन सँल्लपन्ती
वक्त्रं चुचुम्ब मृदु मुग्धतरं मुरारेः ॥ १२८ ॥

ईषद्गलत्कुचपटीमितरा कटाक्षै-
रन्यामतर्जयदनुस्फुरदल्पहासा ।
आसङ्गतो मुरहरस्य निजात्तवासो
नैवाविदत् किमपि सा गलितं नितम्बात् ॥१२९॥

वानीरवेश्मसु लताभवनान्तरेषु
भूयो गुहासु च शिलासु च सैकतेषु ।
नीत्वा पृथक् पृथगिमा रमयाञ्चकार
विश्वेश्वरः स बहुधा विहितात्ममूर्तिः ॥ १३० ॥

इन्धानरागविवशं व्रजसुन्दरीणां
वृन्दं रतिश्रमवशेन परिश्लथाङ्गम् ।
उद्धूतसादमुदयत्प्रमदं वितेने
देवो हरिः सुललितैरुपचारभेदैः ॥ १३१ ॥

कस्याश्चिदायतदृशः सुरतश्रमेण
सन्नौ शिरीषकुसुमाधिकसौकुमार्यौ ।
अङ्के निधाय चरणौ तरुणाब्जभासा
मन्दं करेण विममर्द रमासहायः ॥ १३२ ॥

स्विन्नाननामभजदन्यवधूं रतान्ते
संवीजयन् किसलयव्यजनेन मन्दम् ।
अन्तर्निबद्धवसतिं मदनाग्निमस्याः
सन्धुक्षयन्निव सरोजदलायताक्षः ॥ १३३ ॥

अङ्के परां समुपवेश्य कराम्बुजाभ्या-
मङ्गीचकार मुरजित् कचभारशिक्षाम् ।
अङ्कूरयन् निजनखावलिकान्तिभङ्ग्या
कङ्केलिकुड्मलकृतामवतंसलक्ष्मीम् ॥ १३४ ॥

तन्वीं रतिश्रमवशादुरसि प्रसुप्ता-
मन्यां वहन्नयमशेत लतानिकुञ्जे ।
विस्मृत्य मोदपरवानुरगेन्द्रशय्यां
विश्वोत्तरामपि सुतां कलशाम्बुराशेः ॥ १३५ ॥

अन्यां रतस्य विरतौ पुनरुच्चलन्ती-
माकृष्य वक्षसि निपत्य भुजालताभ्याम् ।
बिम्बाधरं मधुरमारसयन् प्रकाम-
मम्भोधिलब्धममृतं स तृणाय मेने ॥ १३६ ॥

विस्रंसितं सरसिजायुधसम्प्रहारे
कस्याश्चिदम्बुरुहचारुरुचा करेण ।
स्निग्धं बबन्ध चिकुरं कुकुराधिनाथ-
श्चित्तं च मुग्धहरिणीमधुरेक्षणायाः ॥ १३७ ॥

तालीदलेन रचितं गलितं रतान्ते
ताटङ्कमीषदवलम्बिनि कर्णपाशे ।
कस्याश्चिदेष कलयन् कुतुकी चुचुम्ब
कस्तूरिकापरिमलोन्मिलिते कपोले ॥ १३८ ॥

एवं समस्तजगतामधिपेन तेन
लक्ष्मीवरेण सरसं परिलाल्यमानाः ।
आभीरनाथकपुरीसुदृशः क्षणेन
सौभाग्यभारमदमत्तधियो बभूवुः ॥ १३९ ॥

तासामिति प्रतिपदं परिवर्धमानं
　　सौभाग्यदर्पमपनेतुमना वधूनाम् ।
आदाय तासु पुनरेकतमां प्रसीदन्
　　देवो दयाजलनिधिस्तरसा तिरोऽभूत् ॥ १४० ॥

अन्तर्हितेऽथ सहसा सरसीरुहाक्षे
　　सन्तापदूनमनसः पशुपालकान्ताः ।
वृन्दावने तमतिमुग्धधियो विचिक्यु-
　　रन्तर्निगूढवपुषं निगमान्तवाचाम् ॥ १४१ ॥

उन्मत्ततामुपगता विततिवर्धूना-
　　मुन्मस्तकेन मदनेषुविजृम्भितेन ।
अन्धम्भविष्णुहृदया विचचार शौरेः
　　सन्दर्शनार्थमनुयुक्ततदीयवार्ता ॥ १४२ ॥

दृष्टस्त्वया तुलसि! किन्नु कळायनीलः
　　कश्चिद्युवा कमलपत्रविशालनेत्रः ।
बिभ्रद् गले तव दलैः कलितामभीष्टां
　　मालां मधुव्रतकदम्बपतिव्रतानाम् ॥ १४३ ॥

अप्यक्षितः किमु पलाश! कलेशकान्तं
　　वक्त्रं वहन् विपिनसीमनि कोऽपि कामी ।
त्वत्पुष्पकोटिसुभगा परिभाति पङ्क्ति-
　　र्यत्पार्श्वयोरभिनवा करजक्षतानाम् ॥ १४४ ॥

कल्याणमस्तु तव मा भज मौनमुद्रां
मल्लीलते! कथय वल्लवनाथवार्ताम् ।
अध्यक्षितः स विपिने नियतं त्वया यद्
बध्नाति मुग्धहसितं मुकुलच्छलेन ॥ १४५ ॥

कच्चिन्मयूर! विपिने भवता व्यलोकि
कश्चित् पुमानभिनवाङ्गजभङ्गिचोरः ।
यस्य त्वदीयजनपिञ्छभरावनद्ध-
माभाति कैश्यमसिताम्बुदकान्तिदेश्यम् ॥ १४६ ॥

एणाधिराजदयिते! किमु नन्दसूनु-
रालोकितो हृदयहारिवपुर्वधूनाम् ।
नो चेदकृत्रिमविलासतरङ्गभाजो-
रादीर्घयोर्नयनयोर्जननं वृथा ते ॥ १४७ ॥

आचक्ष्व कोकवनिते! सति! नन्दसूनु-
रालोकितो यदि तदीयदशामशेषाम् ।
जानासि किं न निशि निश्यनुभूतियोगा-
न्नारीजनस्य निजकान्तवियोगखेदम् ॥ १४८ ॥

अम्भोधिगेहिनि! कलिन्दसुते! वद त्व-
मम्भोरुहाक्षपदवीमदवीयसीं नः ।
आलोकयालघुदयं वनिताभिराभि-
श्चूडापदे घटितमञ्जलिपुञ्जमेनम् ॥ १४९ ॥

एनं जनं किमवलोक्य मनोभवार्तं
फेनच्छलेन कुरुषे परिहासमुद्राम् ।
पाथोधिसङ्गमरसेन ननु त्वमेवं
वेगेन यास्यविदितं किमिदं जनौघैः ॥ १५० ॥

इत्थं विगाढमदना विपिने चरन्त्यो
गोपालवामनयना विगलद्विलापाः ।
पृथ्वीतले नरकशासितुरङ्घ्रिमुद्रा-
मद्राक्षुरब्जकुलिशाङ्कुशमत्स्यचिह्नाम् ॥ १५१ ॥

अभ्युन्नतामनतिगौरवतः पुरस्ता-
न्निम्नामतीव च नितम्बभरेण पश्चात् ।
तत्सन्निधौ चरणपद्धतिरन्यवध्वा
निध्याय मुग्धनयना नितरां विषेदुः ॥ १५२ ॥

ऊचुश्च ता नियतमेष तिरोहितोऽभू-
दन्यां वधूमनुपमामनुभोक्तुकामैः ।
धन्या परं वसुमतीवलये वधूः सा
यस्या मनस्यसदृशाभिरतिः प्रियोऽभूत् ॥ १५३ ॥

अत्रोपविष्टमनया सह तेन नूनं
कर्पूरपल्लवमयं शयनीयमेतत् ।
तस्मात् तरोरवचितैः कुसुमैरकारि
तस्याः प्रसाधनविधिः सुकृतोत्तरायाः ॥ १५४ ॥

आलोकयन्तु वनिताः पदपङ्क्तिमेनां
दामोदरस्य चरतो वनितां विशेषात् ।
आरोप्य तां निजगले नियतं प्रयातो
नारीमसावनितरोपमभागधेयाम् ॥ १५५ ॥

इत्यादिविह्वलगिरो वनिताश्चरन्त्यो
मध्येवनं ददृशुरात्मसखीं तथैकाम् ।
त्यक्तां प्रियेण निजदुस्स्मयतः शयानां
मूर्च्छाभिषङ्गमुकुलन्नयनारविन्दाम् ॥ १५६ ॥

सा चोत्तरीयपवनैरपनीतमोहा
ताभिः सखीभिरथ पर्यनुयुक्तवार्ता ।
स्मृत्वा स्वदुर्विनयमश्रुतरङ्गिताक्षी
मुग्धेक्षणा कथयति स्म निजामवस्थाम् ॥ १५७ ॥

आकृष्य मां मधुरमुग्धविलासपाशै-
रन्यूनरागविवशामरविन्दनेत्रः ।
अत्रागतो रहसि मन्मथनर्मभेद-
सम्मानमेदुरमदामकरोदिमां माम् ॥ १५८ ॥

नाहं पदेन नवपङ्कजकोमलेन
सञ्चारमत्र विषहे निशि काननान्ते ।
यद्यस्ति ते कुतुकमंसपदे प्रियां मा-
मारोप्य याहि दयितेत्यवदं मदान्धा ॥ १५९ ॥

अन्तःस्मयेन विवशामिति सञ्जपन्तीं
स्कन्धे वहन्निह चरन् विपिनान्तराले ।
सन्त्यज्य मामपदयं निशि निस्सहाया-
मन्तर्दधे यदुपतिः कितवाग्रयायी ॥ १६० ॥

इत्थं निशम्य वनिता वचनं तदीयं
सत्रा तया मदनसायकदूयमानाः ।
इन्दौ शनैरपरदिश्यवलम्बमाने
बृन्दावनात् तपनजापुलिनं प्रयाताः ॥ १६१ ॥

तत्रोपविश्य मिलिताः पुलिने समस्ताः
स्मृत्वा हरिं मनसि जारतया परेशम् ।
चक्रुर्विलापमबला विगतान्यचिन्ता
भक्तिस्मरार्तिपिशुनैर्वचसां विशेषैः ॥ १६२ ॥

क्वासि प्रभो! वितर नः प्रतिवाक्यमेकं
हा धिक् त्वया वयमधोक्षज! वञ्चिताः स्मः ।
हासावलोकमधुरं वदनं त्वदीयं
दासीजनस्य तव दर्शय दर्शनीयम् ॥ १६३ ॥

सन्तापवेगविधुरीकृतसप्तधातुं
सम्भ्रान्तचित्तमवनौ परिलोठमानम् ।
बिम्बाधरामृतरसेन विधेहि कल्यं
कन्दर्पकालफणिदष्टमिमं जनं त्वम् ॥ १६४ ॥

घोषोदरेषु निहितं नवनीतमादौ
देव! त्वया कुतुकिना मुषितं चिराय ।
अद्यातिमात्रमृदुलं हृदयं ततोऽपि
तद्वासनाविलसितेन हृतं किमासाम् ॥ १६५ ॥

चेतो न जातु करुणामृदुलं त्वदीयं
जातादरासु जगदीश! नितम्बिनीषु ।
नीता नितान्तकठिनेन कृतान्तगेहे
पीतस्तनेन भवता ननु पूतना सा ॥ १६६ ॥

यातं मदालसमतङ्गजमन्दमन्दं
गीतं च ते परिविचिन्त्य नितान्तरम्यम् ।
शीतांशुपादपरिचुम्बितचन्द्रकान्त-
रीतिं मनो भजति नः सततं किमेतत् ॥ १६७ ॥

रूढानुरागविधुरास्त्वयि निर्दयेऽस्मिन्
गूढाभिके शठ! कठोरधियां पुरोगे ।
मूढा वयं कपटनाटकरीतिबाह्याः
प्रौढाङ्गनासदसि हास्यपदं प्रयाताः ॥ १६८ ॥

पिञ्छावतंसधरमाञ्चितपीतचेलं
कञ्जाभिरामनयनं वपुरञ्जनाभम् ।
सञ्चिन्त्य देव! तव सन्ततमन्तरङ्गं
सञ्जायते सरसिजाक्ष! भवन्मयं नः ॥ १६९ ॥

यद्यस्ति कान्त! करुणा तव निर्व्यलीका
यद्यस्ति वा मनसि भक्तिरकृत्रिमा नः ।
तद्देवदेव! दलिताञ्जनकान्तिचोरं
सद्यः प्रदर्शय विभो! भवतः स्वरूपम् ॥ १७० ॥

इत्थं विलापवचनं विविधं वधूना-
मुद्वेलरागमवकर्णयतो मुरारेः ।
कारुण्यवारिनिधिपूर्णशरत्सुधांशो-
र्दैवाद् द्रुतं विजगलेऽथ तिरस्करिण्या ॥ १७१ ॥

स्मेरं वहन् वदनमम्बुरुहायताक्षं
मारावलेपहरमङ्गलरूपलक्ष्मीः ।
ताराधिनाथ इव नीरदवृन्दमध्या-
न्नारायणो नयनगोचरतां प्रपेदे ॥ १७२ ॥

दृष्ट्वा समस्तपरितापहरं पुरस्ता-
द्देवं प्रसन्नहृदयाः प्रमदा बभूवुः ।
घर्मातुरा इव बकोटविलासवत्यः
सम्मेदुरं नभसि वीक्ष्य नवं पयोदम् ॥ १७३ ॥

काचित् समेत्य सहसैव भुजालताभ्या-
मालिङ्ग्य गाढमवनम्रमुखारविन्दा ।
तस्थौ क्षणं प्रणयरोषभरानुषङ्गा-
दर्धोदितोद्दलितगद्गदवल्गुवाणी

अन्तर्नियम्य मुदमुच्चलितां कथञ्चि-
दारोप्य रोषमपरा क्षणमास्त तूष्णीम् ।
नीवी तु भावमखिलं हृदये निगूढ-
मावेदयत् करधृतापि मुहुर्गलन्ती ॥ १७५ ॥

अन्या वियोगरुजया रुदती निरीक्ष्य
कृष्णं पुनः पुनरपि प्ररुरोद तन्वी ।
आस्राम्भसामशिशिरा शिशिरा च तस्याः
खेदं मुदं च न परं विववार धारा ॥ १७६ ॥

कृष्णावलोकनमुदा सहसैव जातं
हासं निगूहितुमतिष्ठदथान्यनारी ।
वेणीभरेण पिहितं वदनं वहन्ती
नीलाम्बुदावलिनिरुद्धमिवेन्दुबिम्बम् ॥ १७७ ॥

आकूतमन्तरुदितं निखिलं वदद्भि-
रस्पन्दमन्दमसृणैरतिमुग्धपातैः ।
आत्तानुरागमबला पुनरङ्कपालीं
नेत्राञ्चलैरकृत काचन गूढगूढम् ॥ १७८ ॥

मन्दं जहास पुनरन्यतरा निरीक्ष्य
नन्दात्मजं सपदि विश्लथमानबन्धा ।
दन्तांशुसन्ततिमिषेण विमेलयन्ती
मन्दाकिनीं यमुनया कमनीयगात्री ॥ १७९ ॥

आपीय नेत्रयुगलेन तदीयमङ्ग-
मन्तः प्रवेश्य मनसा परिरभ्य गाढम् ।
उद्भिद्यमानपुलका मुकुलीकृताक्षी
काचित् समाधिगतयोगिदशामयासीत् ॥ १८० ॥

इत्थं स्मरोदयविलासतरङ्गिताभि-
स्ताभिः समं व्रजवधूभिरुदारधामा ।
मायागृहीतपशुपालवपुः परात्मा
भूयोऽपि भूरिकरुणो विहृतिं वितेने ॥ १८१ ॥

स्वैरुत्तरीयवसनैः कुचभारलिप्त-
कस्तूरिकासुभगसौरभवासिताग्रैः ।
भद्रासने पशुपवारविलासिनीभिः
क्लृप्ते निबद्धकुतुकं निषसाद देवः ॥ १८२ ॥

भूषामणीपटलकान्तिमनोहराभि-
स्ताभिः परं विरुरुचे मुरजित् परीतः ।
पूर्णः कलाभिरखिलाभिरनुत्तमश्री-
स्तारावलीभिरिव शारदशीतधामा ॥ १८३ ॥

तासां निगूढविसरं हृदये गभीरे
हासावलोकनलवैर्निपुणानुमेयम् ।
स्वीयापराधजनितं प्रशमं निनीषुः
कोपानुषङ्गमथ वाचमुवाच देवः ॥ १८४ ॥

मा मा रुषं कुरुत चेतसि गोपनार्यो
दीने दयां कुरुत मय्यनवद्यशीलाः ! ।
वक्त्राणि वो विधृतरोषविषादचिह्ना-
न्युत्पादयन्ति हृदये मम खेदभारम् ॥ १८५ ॥

केलीविशेषमिति केवलमेष यातः
सम्प्रत्यदर्शनमहं विपिनान्तराले ।
एतावता किमिदमाकुलमातनुध्वे
शोणाञ्चलानुमितरोषभरैरपाङ्गैः ॥ १८६ ॥

वेणीभरापहृतनीलमणीविलासाः
श्रोणीसमुद्वहनमन्दमनोज्ञयाताः ।
एणीविलोलनयना नयनोपभोग्याः
प्राणा मम प्रतिनवा ननु यूयमेव ॥ १८७ ॥

स्वस्मिन् निबद्धहृदयेषु धृतार्जवेषु
यः कैतवं न विजहाति नरो जनेषु ।
सत्सन्निधौ स खलु सर्वगुणोत्तरोऽपि
कुत्सापदं भवति नाविदितं मयैतत् ॥ १८८ ॥

यन्मामपेतकपटैरनुवृत्तिभेदैः
सम्मेदुरप्रमदमातनुथ प्रकामम् ।
युष्मभ्यमेणनयनास्तदिहार्पयित्वा
प्राणानपि प्रियतमानृणिनो भवामः ॥ १८९ ॥

हित्वा निजान् पतिसुतान्स्वजनानशेषा
नत्रागता यदबला निशि निस्सहायाः ।
मत्सङ्गकौतुकभरेण परं जितोऽस्मि
निस्संशयं तदपरैः किमनेकवाक्यैः ॥ १९० ॥

सामोक्तिभिः सरसमित्यनुनीय सर्वाः
सोमाभिरामवदनाः सदनं द्रयायाः ।
ताभिः समं तदनुसारविहारसारा-
दारब्धवानधिकमोदभरो मुकुन्दः ॥ १९१ ॥

मध्ये वितस्तिविमितं विनिधाय शङ्कुं
पार्श्वेषु तस्य परिमण्डलसम्प्रचारा ।
गोपीततिर्विरुरुचे विमला ध्रुवस्य
ताराबलीव परितो नभसि भ्रमन्ती ॥ १९२ ॥

आश्रित्य विस्मयकरीं निजयोगमायां
पार्श्वद्वयेऽपि पशुपालनितम्बिनीनाम् ।
मध्ये च मध्यनिहितस्य वितस्तिशङ्को-
रुद्वीक्ष्यमूर्तिरभवत् सहसैव देवः ॥ १९३ ॥

एकेन शङ्कुमधिरुह्य स मूर्तिभेदे-
नालोकयन्नपरमूर्तिगणस्य लीलाम् ।
द्रष्टा च दृश्यमपि वस्तु समस्तमेत-
देको जगत्यहमिति क्रियया विवव्रे ॥ १९४ ॥

सव्यापसव्यविलसत्परपूरुषा सा
सम्पूर्णमण्डलपरिभ्रमणा विरेजे ।
एकान्तरग्रथितविद्रुमशक्रनील-
मालाकलापतुलिता परिषद् वधूनाम् ॥ १९५ ॥

एकाखिलक्रमसमुद्गतवल्गुगीतै-
र्वाचालकङ्कणकराञ्चलताडनैश्च ।
उन्मूर्च्छितैश्च रणितैर्मणिमेखलानां
दिङ्मण्डली सपदि शब्दमयी बभूव ॥ १९६ ॥

आबद्धतालसुभगैश्चरणाग्रपातै-
राधूननैश्च विचरद्वलयैर्भुजानाम् ।
आलोकनैश्च मृदुहाससुधासहायै-
रातेनिरे यदुपतेः प्रमदाः प्रमोदम् ॥ १९७ ॥

साकं प्रियाभिरधिरूढकुतूहलाभिः
पातुं दृशा भगवतो रुचिरं विहारम् ।
आगच्छतामखिलनाकसदां विमानै-
राकाशवर्त्म निखिलं निबिरीसमासीत् ॥ १९८ ॥

तालानुकूलममरैरभिहन्यमाना
नेदुर्मृदङ्गपणवानकमड्डलाद्याः ।
पेतुश्च सूनिकराः सुरसुन्दरीभि-
र्जातप्रमोदसरसं तरसा विमुक्ताः ॥ १९९ ॥

विक्रीडितं तदवलोक्य रथाङ्गपाणेः
स्वर्गाङ्गना विदलिताः कुसुमास्त्रबाणैः ।
आभोगिसौभगविलाससमुन्नताय
गोपीजनाय सकलाः स्पृहयाम्बभूवुः ॥ २०० ॥

इत्थं विहृत्य सह गोपविलासिनीनां
वर्गेण वल्गुतरनिर्भरविभ्रमेण ।
श्रान्तो विवेश यमुनासलिलं समेतः
कान्ताजनैरिव करिप्रवरो मदान्धः ॥ २०१ ॥

आरोहचक्रकुचकुम्भभरेषु मग्ने-
ष्वाभीरसुन्दरदृशामतिपीवरेषु ।
उत्सर्पिणा सलिलपूरभरेण दूर-
मुत्कूलतामगमदर्कसुताप्रवाहः ॥ २०२ ॥

अन्तर्गतैः कुचभरैः कुटिलेक्षणाना-
मम्भस्तदम्बुनिधिजीवितवल्लभायाः ।
पक्षव्यपायचकितैः शरणं प्रयातैः
पृथ्वीधरैरिव पयः शुशुभे पयोधेः ॥ २०३ ॥

आकण्ठमग्नवपुषामबलाजनाना-
मम्भोरुहाणि वदनैरविशेषमापुः ।
वेणीविधेयवलनैः सलिलोपलक्ष्यै-
र्वेणीभरैरपि च शैवलमण्डलानि ॥ २०४ ॥

दूरादुपेत्य विजिताशुगवातवेगं
व्याधूनती करयुगं तटिनीतटान्तात् ।

उद्वल्गदुज्ज्वलदुकूलविलक्ष्यपीन-
श्रोणीभरा पयसि कापि ववल्ग तन्वी ॥ २०५ ॥

आगामिनीरभिमुखं मुहुरूर्मिमाला
बाहासरोजयुगलेन विचूर्णयन्ती ।
अक्षामसोदमपरा विजहार तोये
वक्षोजकुम्भयुगलीविहितावलम्बा ॥ २०६ ॥

मुक्तागुणादधिकतुङ्गतरङ्गमाला-
संघट्टवेगदलिताद्गलितैर्वधूनाम् ।
मुक्ताफलैरनुचकार कलिन्दकन्या
सापत्न्यमत्सरभरादिव ताम्रपर्णीम् ॥ २०७ ॥

एणीदृशां पयसि मज्जनकेलिभाजां
शोणीकृता परिचयात् कुचकुङ्कुमानाम् ।
वेणीसमागमविधौ तपनात्मजा मयाः
शोणभ्रमं मनसि वारिनिधेर्बबन्ध ॥ २०८ ॥

मग्नः स्वयं रहसि पाणिदलेन देवः
कस्याश्चिदम्बुगतमस्पृशदूरुमूलम् ।
विज्ञातमन्यवनिताभिरिदं तदेव
सस्वेदलेशमवलोक्य तदीयफालम् ॥ २०९ ॥

आसिच्यमानतनुरञ्जलिसंगृहीतै-
रम्भोभिराचकुतुकं कमनीजनेन ।
देवः पृथक् पृथगिमाः परिषेक्तुकामो
दोष्णां शताय मनसा स्पृहयाञ्चकार ॥ २१० ॥

इत्थं विहृत्य सलिलात् तपनात्मजायाः
साकं वधूपरिषदा हरिरुत्ततार ।
अस्ताचलेन्द्रशिखरादनुयाततारो
वारान्निधाववततार च शीतधामा ॥ २११ ॥

आधूतपक्षतिपुटाश्चरणैर्लिखन्तः
स्वावासभूरुहशिखाग्रपलाशजालम् ।
आपूरयन् वसुमतीवलयान्तराल-
माम्रेडितैर्गळरवैरथ ताम्रचूडाः ॥ २१२ ॥

प्रारब्धजृम्भणपयोजपरागगौराः
प्राभातिका ववलिरे पवमानपोताः ।
विश्लेषनिर्भररुजां वनिताजनानां
निःश्वासगन्धवहसङ्गवशात् कवोष्णाः ॥ २१३ ॥

अर्कोदये स्फुरति नाधिकविप्रकृष्टे
चक्राङ्गनाजनमनस्युदितः प्रमोदः ।
गोपीजनस्य तु विचिन्त्य वियोगपीडा-
मागामिनीमभवदस्तमितः क्षणेन ॥ २१४ ॥

आश्लिष्य गाढमुरसा सरसैर्वचोभिः
सम्मानयन् परिमृशन् मुहुरङ्गकानि ।
भूयः प्रदोषविरतौ यमुनातटान्ते
सङ्केतदानमुदिता व्यसृजत् स योषाः ॥ २१५ ॥

नन्दात्मजेन दयितेन ततो विसृष्टा
मन्दं ययुर्निजनिजानि पदानि योषाः ।

घूर्णद्विलोचनयुगा निशि जागरेण
मार्गे समेऽपि च मुहुः स्खलदङ्घ्रिपद्माः ॥२१६॥

नारायणेन निहितानि निजाङ्कभेषु
नारीजनस्य रुचिराणि नखक्षतानि ।
घोषाङ्कणे विचरतो विरतौ निशायां
भूषागणादपि परां सुषमां वितेनुः ॥ २१७ ॥

मायाबलेन महता मधुसूदनस्य
नो वल्लवाः कमपि वृत्तमिदं व्यजानन् ।
स्वं स्वं वधूजनमनूनरसं पुरेव
ते मेनिरे सविधसीमनि वर्तमानम् ॥ २१८ ॥

आभीरसुन्दरदृशामतिपुण्यभाजा-
मापूरयन्नभिमतान्यरविन्दनेत्रः ।
उन्निद्रचन्द्रसुषमासखमेवमेव
निन्ये गणं निखिलमेष शरन्निशानाम् ॥ २१९ ॥

विक्रीडितं व्रजवधूनिवहैरिदं य-
श्चक्रायुधस्य कथयत्यनुमोदते वा ।
भक्तस्य तस्य भगवत्पदपङ्कजेऽन्ते
मुक्तिः करे ननु किमत्र विचारणीयम् ॥ २२० ॥

श्लोकानुक्रमणी

श्लोकादिः	पृष्ठम्
अङ्के परां समुपवेश्य	२७
अङ्के वधूमभिमुखीं	२५
अत्रोपविष्टमनया	३१
अध्यासितः किमु	२९
अन्तःस्मयेन विवशामिति	३३
अन्तर्गतैः कुचभरैः	४१
अन्तर्नियम्य मुदमुच्चलितां	३६
अन्तर्हितः प्रथमशैलतटी	७
अन्तर्हितेऽथ सहसा	२९
अन्यां रतस्य विरतौ	२८
अन्या वियोगरुजया	३६
अभ्युन्नतामनतिगौरवतः	३१
अम्भोधिगेहिनि कलिन्द	३०
अर्के गते शिशिरता	५
अर्कोदये स्फुरति	४३
अश्रान्तसञ्चरण	५
अस्तोककान्तिभरमम्बु	७
आकण्ठमग्नवपुषामबला	४१
आकर्णने यदि मनः	२२
आकर्ण्य तद्वचनमादृत	२३
आकारयत्ययमनङ्ग	१५
आकाशमार्गमकठोर	४
आकूतमन्तरुदितं	३६
आकृष्य मां मधुर	३२
आकृष्यमाणहृदया	१५
आगामिनं विरहवेग	६
आगामिनीरभिमुखं	४२
आचक्ष्व कोकवनिते!	३०
आडम्बरासहरुचा	१८
आतुङ्गकान्तिरुचिरां	,,
आतुङ्गमस्तकमनस्तमितानु	१
आतुङ्गरक्तनखपङ्क्तिदला	१०
आधूतपक्षति	४३
आन्दोलनस्फुरितकुण्डल	३४
आपाण्डरेण वदनेन	७
आपादचूडमुदितान्य	३
आपादचूडविधृताभरणांशु	२०
आपीय नेत्रयुगलेन	३७
आपूर्णबाष्पसलिले	२३
आबद्धताल	४०

श्लोकादिः	पृष्ठम्
अविभ्रांत सुभग	१८
आभीरसुन्दर	४४
आभोगभाजिनि	१०
आमन्दचारु	११
आमोदवान् मणि	१०
आमोदिनं	४
आरब्धघोर	१४
आरोप्य काञ्चिदबलां	२६
आरोप्य दक्षिण	१७
आरोहचक्रकुचकुम्भ	४१
आलक्ष्यचारुतर	९
आलक्ष्यमब्धिसलिले	५
आलम्बिनीं गलतले	१०
आलोकयन्तु वनिताः	३२
आलोलकान्तिसुभगं	१८
आलोलचारुचिकुरा	१६
आलोलभूषण	२५
आश्रित्य विस्मयकरीं	३९
आश्लिष्य गाढमुरसा	४३
आसिच्यमानतनु	४२
आस्ताविलाक्षमधिक	२३
इत्थं गता	१७
इत्थं निशम्य	३३
इत्थं प्रसाधितवपुः	११
इत्थं विगाढमदना	३१

श्लोकादिः	पृष्ठम्
इत्थं विलापवचनं	३५
इत्थं विहृत्य सलिलात्	४३
इत्थं विहृत्य सह गोप	४१
इत्थं सरोदयविलास	३७
इत्यादि विह्वलगिरो	३२
इन्धानरागविवशं	२७
इन्धानसान्द्रसुषमा	७
ईषद्गलत्कुचपटीमितरा	२६
उद्दीप्यते मनसि	२४
उद्योगवत्युडुगणाधिप	७
उन्मत्ततामुपगता	२९
ऊचुश्च ता नियतमेष	३१
एकाखिलकमसमुद्गत	४०
एकेन शङ्कुमधिरुह्य	३९
एणाधिराजदयिते ! किमु	३०
एणीदृशां पयसि	४२
एनं जनं किमवलोक्य	३१
एनं यदि त्यजसि	२४
एवं समस्त	२८
एह्येहि नाथ !	२६
कच्चिन्मयूर ! विपिने	३०
कल्याणमस्तु तव	,,
कल्लोलकान्तिलहरी	१९
कल्लोलिनीरमणमात्म	८
कस्तूरिकातिलकभङ्गि	१५

श्लोकादिः	पृष्ठम्
कस्याश्चिदायतदृशः	२७
काचित्समेत्य सहसैव	१५
कान्तासपीतिसरसं	६
कालाम्बुवाहपटलस्य	१७
किञ्चाधुना वनगुहासु	२२
कृष्णावलोकनमुदा	३६
केलीविशेषमिति चेतसि	३८
क्रीडागृहेषु कुसुमोत्कर	२१
क्वासि प्रभो! वितर	३३
गां मानसादभिययुः	४
गाढेतरं मधुजिता	९
गीतं श्रुतिस्वर	१३
गुञ्जाफलैर्विकृतमेचक	१०
गोपीजनस्य नयनप्रमदं	९
घोषोदरेषु निहितं	३४
चञ्चत्प्रभाविसरवञ्चित	२०
चेतो न जातु करुणा	३४
तत्तादृशप्रणयसार	१४
तत्रोपविश्य मिलिताः	३३
तत्रोपविश्य सरसं	१३
तन्वीं रतिश्रमवशादुरसि	२८
तादृङ्क्रमागलितमेकमतीव	१६
तादृस्थ्यमुद्रितपदानि	२४
तालानुकूलममरैरभि	४०
तालीदलेन रचितं	२८
तासां निगूढविसरं	३७
तासामिति प्रतिपदं	२९
तासामिति प्रलपितं	२५
दन्ताञ्चलप्रहरणेन	२६
दिष्ट्या दृशोरुपगताः	२१
दूरादुपेत्य विजिता	४१
दूरीकृतामृत	२०
दृष्टस्त्वया तुलसि!	२९
दृष्ट्वा समस्तपरितापहरं	३५
नन्दात्मजेन दयितेन	४३
नाथ त्वया विगदितं	२५
नादामृतेन तव	२४
नादेन तेन नवराग	१५
नारायणेन निहितानि	४४
नारीजनं रमयितुं	३
नाहं पदेन नवपङ्कज	३२
निर्धूतनीलसरसीरुहचारु	१९
निर्वृत्तमज्जनसुखा	१२
नेत्रान्तसीम्नि	१४
नैशं तमो विगत	४
पश्यन् पुरः पुरविरोधि	२१
पश्यन् वनश्रियमनुज्झित	१२
पाणिद्वयेन विरणन्मणि	२०
पाथोजिनीप्रकटितस्फुरणा	८
पाथोरुहाणि भुवने	,,

श्लोकादिः	पुटम्	श्लोकादिः	पुटम्
पारप्रयाणसुहृदः	१	मन्देतरं हुबुहुबुस्वन	१२
पिञ्छावतंसधरमञ्चित	३४	मन्दोन्मिषत्कुसुमविभ्रम	११
पीडाभरं मनसि	६	मल्लीलताविकसितैः	४
प्रत्यर्पितं प्रणयिना	१४	माध्वीरसं रसयतामलि	३
प्राचेतसो विजबतां	२	मा मा रुषं कुरुत	३८
प्रारब्धजृम्भणपयोज	४३	मा मा विभो कथय	२३
प्रालेयभानुरुदितो	८	मायाबलेन महता	४४
प्रालेयशङ्खकुमुद	१	मालेयसौरभवता	२९
बद्धा निर्जेन दयितेन	१७	मुक्तागुणादधिकतुङ्ग	४२
बन्धूकबन्धुर	१९	मुग्धप्रवालमिलित	२०
बालायिता मृदुतरै	११	मूर्च्छालयातिसुभगैर्मदना	१२
बालेन्दुसुन्दररुचा	९	यद्यस्ति कान्त! करुणा	३५
भर्तुर्निजस्य परिचार	२४	यद्वा विलोकयितुमद्य	२२
भाग्येन केनचिदनर्गल	२	यन्मामपेतकपटैरनुवृत्ति	३८
भूतं भविष्यदपि चेतसि	११	यातं मदालसमतङ्गज	३४
भूभारभूतदनुजक्षपणाय	२	रूढानुरागविधुरास्त्वयि	,,
भूषामणीपटलकान्ति	३७	लोकान्तरं व्रजति	६
भृङ्गी विहाय मधुरं	१३	लोकाभिरामतरया	९
मग्नः स्वयं रहसि	४२	वक्षःस्थले मरतकाश्मतला	१८
मञ्जीररत्ननिकरद्युति	१७	बन्दारुदेवकुलमौलि	२
मत्प्रीणनाय यदि	२२	वल्लीभिरुल्लसितसून	१२
मध्ये वितस्तिविमितं	३९	वानीरवेश्मसु तुषार	,,
मन्दं जहास पुनरन्यतरा	३६	वानीरवेश्मसु लता	२७
मन्दं प्रयाहि	२६	विक्रीडितं तदवलोक्य	४१
मन्दप्रयाणचतुरा	५	विक्रीडितं व्रजवधू	४४

श्लोकादिः	पुटम्	श्लोकादिः	पुटम्
विस्रंसितं सरसिजायुध	२८	साकं प्रियेण निशि	१६
वेणीभरापहृत	३८	सा चोत्तरीयपवनैरपनीत	३२
बृन्दावनाद्वितत चन्द्र	२१	साध्वीजनस्य पतिरेव	२३
बृन्दैरमन्दविसरै	८	सामोक्तिभिः	३९
शब्दागमेषु सुलभो	३	स्मेरं वहन् वदनमम्बु	३५
शोणाधरार्पित	२	स्वच्छन्दतो विचरणं	२२
संक्षीयमाणतनवोऽप्यधिकं	३	स्वर्णोपमानरुचिसुन्दर	१९
सग्रामपत्तनपुरं	१५	स्वामिन् निबद्धहृदयेषु	३८
सच्चिन्मयं पुरुषमादृत	२१	स्विन्नाननामभजदन्य	२७
सन्तापवेगविधुरीकृत	३३	स्वैरुत्तरीयवसनैः	३७
सन्दर्शितात्मविभवे	५	हस्ताञ्चले कनकसूत्र	१६
सम्मीलितानि कमलानि	६	हस्तारविन्दयुगलीधृत	१
सव्यापसव्यविलसत्पर	४०	हित्वा निजान्	३९
साकं करम्बितकराम्बु	२५	हित्वा शिशुं परिसरे	१६
साकं प्रियाभिरधिरूढ	४०	हृद्ये ततः क्वचन	१३